श्री धूमावती हृदयं

श्री धूमावती हृदयं

ॐ अस्य श्री धूमावतीहृदयस्तोत्र महामंत्रस्य-पिप्पलादऋषिः- अनुष्टुप्छंदः- श्री धूमावती देवता- धूं बीजं- ह्रीं शक्तिः- क्लीं कीलकं -सर्वशत्रु संहारार्थे जपे विनियोगः

करन्यासः –
ॐ धां अंगुष्ठाभ्यां नमः |
ॐ धीं तर्जनीभ्यां नमः |
ॐ धूं मध्यमाभ्यां नमः |
ॐ धैं अनामिकाभ्यां नमः |
ॐ धौं कनिष्ठकाभ्यां नमः |
ॐ धः करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः –
ॐ धां हृदयाय नमः |
ॐ धीं शिरसे स्वाहा |
ॐ धूं शिखायै वषट् |
ॐ धैं कवचाय हुं |
ॐ धौं नेत्रत्रयाय वौषट् |
ॐ धः अस्त्राय फट् |

ध्यानं |
धूम्राभां धूम्रवस्त्रां प्रकटितदशनां मुक्तबालांबराढ्यां |
काकांकस्यंदनस्थां धवळकरयुगां शूर्पहस्तातिरूक्षां |
कंकांक्षुत्क्षांत देहं मुहुरति कुटिलां वारिदाभां विचित्रां |
ध्यायेद्धूमावतीं कुटिलितनयनां भीतिदां भीषणास्यां || 1 ||

कल्पादौ या काळिकाद्याऽचीकलन्मधुकैटभौ |
कल्पांते त्रिजगत्सर्वं भजे धूमावतीमहं || 2 ||

गुणागारा गम्यगुणा या गुणागुणवर्धिनी |
गीतावेदार्थतत्त्वज्ञैः भजे धूमावतीमहं || 3 ||

खट्वांगधारिणी खर्वखंडिनी खलरक्षसां |
धारिणी खेटकस्यापि भजे धूमावतीमहं || 4 ||

घूर्ण घूर्णकराघोरा घूर्णिताक्षी घनस्वना |
घातिनी घातकानां या भजे धूमावतीमहं || 5 ||

चर्वंतीमस्तिखंडानां चंडमुंडविदारिणीं |
चंडाट्टहासिनीं देवीं भजे धूमावतीमहं || 6 ||

छिन्नग्रीवां क्षतांछन्नां छिन्नमस्तास्वरूपिणीं |
छेदिनीं दुष्टसंघानां भजे धूमावतीमहं || 7 ||

जाताया याचितादेवैरसुराणां विघातिनीं |
जल्पंतीं बहुगर्जंतीं भजेतां धूम्ररूपिणीं || 8 ||

झंकारकारिणीं झुंझा झंझमाझमवादिनीं |
झटित्याकर्षिणीं देवीं भजे धूमावतीमहं || 9 ||

हेतिपटंकारसंयुक्तान् धनुष्टंकारकारिणीं |
घोराघनघटाटोपां वंदे धूमावतीमहं || 10 ||

ठंठंठंठं मनुप्रीतां ठःठःमंत्रस्वरूपिणीं |
ठमकाह्वगतिप्रीतां भजे धूमावतीमहं || 11 ||

डमरू डिंडिमारावां डाकिनीगणमंडितां |
डाकिनीभोगसंतुष्टां भजे धूमावतीमहं || 12 ||

ढक्कानादेनसंतुष्टां ढक्कावादनसिद्धिदां |
ढक्कावादचलच्चित्तां भजे धूमावतीमहं || 13 ||

तत्ववार्ता प्रियप्राणां भवपाथोधितारिणीं |
तारस्वरूपिणीं तारां भजे धूमावतीमहं || 14 ||

थांथींथूंथेमंत्ररूपां थैंथोथंथःस्वरूपिणीं |
थकारवर्णसर्वस्वां भजे धूमावतीमहं || 15 ||

दुर्गास्वरूपिणीदेवीं दुष्टदानवदारिणीं |
देवदैत्यकृतध्वंसां वंदे धूमावतीमहं || 16 ||

ध्वांताकारांधकध्वंसां मुक्तधम्मिल्लधारिणीं |
धूमधाराप्रभां धीरां भजे धूमावतीमहं || 17 ||

नर्तकीनटनप्रीतां नाट्यकर्मविवर्धिनीं |
नारसिंहीं नराराध्यां नौमि धूमावतीमहं || 18 ||

पार्वतीपतिसंपूज्यां पर्वतोपरिवासिनीं |
पद्मारूपां पद्मपूज्यां नौमि धूमावतीमहं || 19 ||

फूत्कारसहितश्वासां फट्मंत्रफलदायिनीं |
फेत्कारिगणसंसेव्यां सेवे धूमावतीमहं || 20 ||

बलिपूज्यां बलाराध्यां बगळारूपिणीं वरां |
ब्रह्मादिवंदितां विद्यां वंदे धूमावतीमहं || 21 ||

भव्यरूपां भवाराध्यां भुवनेशीस्वरूपिणीं |
भक्तभव्यप्रदां देवीं भजे धूमावतीमहं || 22 ||

मायां मधुमतीं मान्यां मकरध्वजमानितां |
मत्स्यमांसमदास्वादां मन्ये धूमावतीमहं || 23 ||

योगयज्ञप्रसन्नास्यां योगिनीपरिसेवितां |
यशोदां यज्ञफलदां यजेद्धूमावतीमहं || 24 ||

रामाराध्यपदद्वंद्वां रावणध्वंसकारिणीं |
रमेशरमणीपूज्यामहं धूमावतीं श्रये || 25 ||

लक्षलीलाकळालक्ष्यां लोकवंद्यपदांबुजां |
लंबितां बीजकोशाढ्यां वंदे धूमावतीमहं || 26 ||

बकपूज्यपदांभोजां बकध्यानपरायणां |
बालांतीकारिसंध्येयां वंदे धूमावतीमहं || 27 ||

शंकरीं शंकरप्राणां संकटध्वंसकारिणीं |
शत्रुसंहारिणीं शुद्धां श्रये धूमावतीमहं || 28 ||

षडाननारिसंहंत्रीं षोडशीरूपधारिणीं |
षड्रसास्वादिनीं सौम्यां नेवे धूमावतीमहं || 29 ||

सुरसेवितपादाब्जां सुरसौख्यप्रदायिनीं |
सुंदरीगणसंसेव्यां सेवे धूमावतीमहं || 30 ||

हेरंबजननीं योग्यां हास्यलास्यविहारिणीं |
हारिणीं शत्रुसंघानां सेवे धूमावतीमहं || 31 ||

क्षीरोदतीरसंवासां क्षीरपानप्रहर्षितां |
क्षणदेशेज्यपादाब्जां सेवे धूमावतीमहं || 32 ||

चतुस्त्रिंशद्वर्णकानां प्रतिवर्णादिनामभिः |
कृतं तु हृदयस्तोत्रं धूमावत्यास्सुसिद्धिदं || 33 ||

य इदं पठति स्तोत्रं पवित्रं पापनाशनं |
स प्राप्नोति परां सिद्धं धूमावत्याः प्रसादतः || 34 ||

पठन्नेकाग्रचित्तोयो यद्यदिच्छति मानवः |
तत्सर्वं समवाप्नोति सत्यं सत्यं वदाम्यहं || 35 ||

इति धूमावतीहृदयं |